# shrI chAmuNDeshvarI aShTottarashatanAma stotraM

# શ્રીચામુણ્ડેશ્વરી અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : shrii chAmuNDeshvaryaaShTottarashatanaamastotram

File name : chAmuNDeshvarI108stotra.itx

Category : aShTottarashatanAma, devii, durgA, stotra, devI

Location : doc_devii

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : May 15, 2007, November 15, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

shrI chAmuNDeshvarI aShTottarashatanAma stotraM

# શ્રીચામુણ્ડેશ્વરી અષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી ચામુણ્ડા માહામાયા શ્રીમત્સિંહાસનેશ્વરી
શ્રીવિદ્યા વેદ્યમહિમા શ્રીચક્રપુરવાસિની ॥ ૧॥

શ્રીકણ્ઠદયિત ગૌરી ગિરિજા ભુવનેશ્વરી
મહાકાળી મહાલ્ક્ષ્મીઃ માહાવાણી મનોન્મણી ॥ ૨॥

સહસ્રશીર્ષસંયુક્તા સહસ્રકરમણ્ડિતા
કૌસુંભવસનોપેતા રત્નકઞ્ચુકધારિણી ॥ ૩॥

ગણેશસ્કન્દજનની જપાકુસુમ ભાસુરા
ઉમા કાત્યાયની દુર્ગા મન્ત્રિણી દણ્ડિની જયા ॥ ૪॥

કરાઙ્ગુળિનખોત્પન્ન નારાયણ દશાકૃતિઃ
સચામરરમાવાણીસવ્યદક્ષિણસેવિતા ॥ ૫॥

ઇન્દ્રાક્ષી બગળા બાલા ચક્રેશી વિજયાઽમ્બિકા
પઞ્ચપ્રેતાસનારૂઢા હરિદ્રાકુઙ્કુમપ્રિયા ॥ ૬॥

મહાબલાઽદ્રિનિલયા મહિષાસુરમર્દિની
મધુકૈટભસંહર્ત્રી મધુરાપુરનાયિકા ॥ ૭॥

કામેશ્વરી યોગનિદ્રા ભવાની ચણ્ડિકા સતી
ચક્રરાજરથારૂઢા સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૮॥

અન્નપૂર્ણા જ્વલઃજિહ્વા કાળરાત્રિસ્વરૂપિણી
નિષુંભ શુંભદમની રક્તબીજનિષૂદિની ॥ ૯॥

બ્રાહ્મ્યાદિમાતૃકારૂપા શુભા ષટ્ચક્રદેવતા
મૂલપ્રકૃતિરૂપાઽઽર્યા પાર્વતી પરમેશ્વરી ॥ ૧૦॥

બિન્દુપીઠકૃતાવાસા ચન્દ્રમણ્ડલમધ્યકા
ચિદગ્નિકુણ્ડસંભૂતા વિન્ધ્યાચલનિવાસિની ॥ ૧૧॥

હયગ્રીવાગસ્ત્ય પૂજ્યા સૂર્યચન્દ્રાગ્નિલોચના
જાલન્ધરસુપીઠસ્થા શિવા દાક્ષાયણીશ્વરી ॥ ૧૨॥

નવાવરણસમ્પૂજ્યા નવાક્ષરમનુસ્તુતા
નવલાવણ્યરૂપાઢ્યા જ્વલદ્દ્વાત્રિંશતાયુધા ॥ ૧૩॥

કામેશબદ્ધમાઙ્ગલ્યા ચન્દ્રરેખા વિભૂષિતા
ચરચરજગદ્રૂપા નિત્યક્લિન્નાઽપરાજિતા ॥ ૧૪॥

ઓડ્યાન્નપીઠનિલયા લલિતા વિષ્ણુસોદરી
દંષ્ટ્રાકરાળવદના વજ્રેશી વહ્નિવાસિની ॥ ૧૫॥

સર્વમઙ્ગળરૂપાઢ્યા સચ્ચિદાનન્દ વિગ્રહા
અષ્ટાદશસુપીઠસ્થા ભેરુણ્ડા ભૈરવી પરા ॥ ૧૬॥

રુણ્ડમાલાલસત્કણ્ઠા ભણ્ડાસુરવિમર્ધિની
પુણ્ડ્રેક્ષુકાણ્ડ કોદણ્ડ પુષ્પબાણ લસત્કરા ॥ ૧૭॥

શિવદૂતી વેદમાતા શાઙ્કરી સિંહવાહના ।
ચતુઃષષ્ટ્યૂપચારાઢ્યા યોગિનીગણસેવિતા ॥ ૧૮॥

નવદુર્ગા ભદ્રકાળી કદમ્બવનવાસિની
ચણ્ડમુણ્ડ શિરઃછેત્રી મહારાજ્ઞી સુધામયી ॥ ૧૯॥

શ્રીચક્રવરતાટઙ્કા શ્રીશૈલભ્રમરામ્બિકા
શ્રીરાજરાજ વરદા શ્રીમત્રિપુરસુન્દરી ॥ ૨૦॥

શાકમ્બરી શાન્તિદાત્રી શતહન્ત્રી શિવપ્રદા
રાકેન્દુવદના રમ્યા રમણીયવરાકૃતિઃ ॥ ૨૧॥

શ્રીમત્ચામુણ્ડિકાદેવ્યા નામ્નામષ્ટોત્તરં શતં
પઠન્ ભક્ત્યાઽર્ચયન્ દેવીં સર્વાન્ કામાનવાપ્નુયાત્ .. ..

ઇતિ શ્રી ચામુણ્ડેશ્વરી અષ્ટોત્તરશતનામ સ્તોત્રમ્ .. ..

Encoded and proofread by antaratma at Safe-mail.net

*shrI chAmuNDeshvarI aShTottarashatanAma stotraM*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*